॥ શ્રીવિષ્ણોઃ ષોડશનામસ્તોત્રમ્ ॥

ઔષધે ચિન્તયેદ્વિષ્ણું ભોજને ચ જનાર્દનમ્ ।
શયને પદ્મનાભં ચ વિવાહે ચ પ્રજાપતિમ્ ॥ ૧॥

યુદ્ધે ચક્રધરં દેવં પ્રવાસે ચ ત્રિવિક્રમમ્ ।
નારાયણં તનુત્યાગે શ્રીધરં પ્રિયસંગમે ॥ ૨॥

દુઃસ્વપ્ને સ્મર ગોવિંદં સંકટે મધુસૂદનમ્ ।
કાનને નારસિંહં ચ પાવકે જલશાયિનમ્ ॥ ૩॥

જલમધ્યે વરાહં ચ પર્વતે રઘુનન્દનમ્ ।
ગમને વામનં ચૈવ સર્વકાર્યેષુ માધવમ્ ॥ ૪॥

ષોડશૈતાનિ નામાનિ પ્રાતરૂત્થાય યઃ પઠેત્ ।
સર્વપાપવિર્નિમુક્તો વિષ્ણુલોકે મહીયતે ॥ ૫॥

। ઇતિ શ્રીવિષ્ણોઃ ષોડશનામસ્તોત્રં સમ્પૂર્ણમ્ ।